**दिनाङ्क :- 22.09.2025**

**प्रात: - 06:55**

**<u>प्रधानमन्त्री-GST</u>**

**प्रधानमन्त्री श्रीनरेन्द्रमोदी उक्तवान्, यत् नेक्स्ट जनरेशन् जी.एस्.टी. परिष्काराः अद्य नवरात्र्याः प्रथमदिनात् आरभ्य प्रवर्तन्ते। राष्ट्रं सम्बोधयता श्रीमोदिना प्रोक्तं यत्, एषः जी. एस्. टी. बचत्-उत्सवः अद्य प्रारभ्यते, यत्र हि जनाः स्वेच्छया वस्तूनि न्यूनमूल्येन क्रेतुं शक्नुवन्ति। सः अवदत्, यत् एतैः परिष्कारैः राष्ट्रस्य विकासगाथा परिवर्तिता भविष्यति तथा च युवकाः, नवमध्यमवर्गः, कृषकाः, महिलाः, उद्यमिनः च अनेन बचत्-उत्सवेन लाभान्विताः भविष्यन्ति।**

**<u>बाइट- पि.एम्. गरीब परिवार</u>**

**प्रधानमन्त्रिणा टिप्पणी कृता यत् नागरिकाः व्यापारिणः च दशकैः करस्य जटिलजाले निबद्धाः आसन्, यत्र ओक्ट्रोइ, प्रवेशकरः, विक्रयकरः, आबकारी, वॉट्, सेवाकरः च आसन्। सः रेखांकितवान् यत्पूर्वं, एकस्मात् नगरात् अन्यस्मिन् नगरे वस्तूनाम् परिवहनार्थं, बहुविधनिरीक्षण-स्थानकानि पारं कृत्वा, असंख्यानि प्रपत्राणि पूरणीयानि आसन्। सः अवोचत् यत् तस्य सर्वकारः चतुर्दशाधिक द्विसहस्र तमे वर्षे सत्ताग्रहणानन्तरं राज्यैः हितधारकैः च सह परामर्शं कृत्वा जी. एस्. टी. इत्यस्य कृते प्राधान्यम् अददात्। केन्द्रराज्ययोः प्रयत्नानन्तरं बहवः व्यर्थ-कराः समाप्ताः इति सः अवदत्। श्रीमोदिना प्रकाशितं यत् नूतनसंरचनायाः अन्तर्गतं केवलं पञ्च प्रतिशतं अष्टादश प्रतिशतं च करपट्टिकाः एव मुख्यतया अवशिष्टाः भविष्यन्ति। सः पुष्टिं कृतवान् यदनेन एकराष्ट्रम्-एककरः इत्यस्य स्वप्नः साकारः अभवत्।**

**शाह- जी. एस्. टी.**

**केन्द्रीय-गृहमन्त्री अमितशाहः अवदत्, यत् नेक्स्ट जनरेशन् जी.एस्.टी. परिष्काराः आत्मनिर्भर भारतस्य लक्ष्यस्य प्राप्तौ प्रमुखां भूमिकां निर्वहन्ति। सोशल मीडिया सन्देशे श्रीशाहः जीएसटी परिष्कारविषये प्रधानमन्त्री नरेन्द्रमोदी इत्यस्य सम्बोधनस्य प्रशंसां कुर्वन् एतत् अवदत्। सः उक्तवान् यत्, कृषिः, स्वास्थ्यं, वस्त्रं, मानवनिर्मिततन्तुः इत्यादिषु क्षेत्रेषु जीएसटी न्यूनीकृत्य निर्माणं वर्धयितुं एषः उपक्रमः कृतः वर्तते।**

**प्रधानमन्त्री नरेन्द्रमोदी-यात्रा**

**प्रधानमन्त्री नरेन्द्रमोदी अद्य अरुणचलप्रदेश त्रिपुरा राज्ययोः यात्रायां भविष्यति। अस्मिन् यात्रावधौ सः एकशताधिक-पञ्चसहस्रकोटि-रूप्यकाणां अनेकविकास-परियोजनानां उद्घाटनं करिष्यति। श्री मोदी अरुणाचलप्रदेशे सप्तशताधिक-त्रिसहस्र-कोट्यधिक-रूप्यकाणां द्वयोः प्रमुखयोः जलविद्युत्प्रकल्पयोः आधारशिलां स्थापयिष्यति। असौ त्रिपुरायां तीर्थयात्रा पुनरुद्धार कार्यं समेत्य आध्यात्मिक - परम्परा - संवर्धन अभियान योजनायाः अन्तर्गतं माताबाड़ी क्षेत्रे माता त्रिपुरा सुंदरी मंदिर परिसरस्य विकास कार्यस्य उद्घाटनं अपि करिष्यति ।**

**नवरात्रिः**

**नवदिवसीयः नवरात्रिमहोत्सवः अद्य आरभ्यते। नवानां रात्रीणां समाहारः नवरात्रम् इत्युच्यते यद्धि, दुर्गादेव्याः, तस्याः नवदुर्गा-अवताराणां च आराधनाय समर्पितम् अस्ति। भारतीयाः संपूर्णे वर्षे चत्वारि नवरात्राणि आचरन्ति, परन्तु केवलं पर्वद्वयं, शारदीयनवारत्रिः, चैत्रनवरात्रिः च सर्वत्र आचर्यते। शारदीयनवरात्रि-उत्सवस्य समापनं दशहरा-अथवा विजयदशमी इत्यनेन भविष्यति, यस्मिन् दिने भगवान् रामः रावणं विजितवान् आसीत्।**

**क्रिकेट्-एशिया कप-विजयः-**

**दुबई अन्ताराष्ट्रिय-क्रीडाङ्गणे एशिया-कप इत्यस्य सुपर-फोर इति क्रिकेट्-प्रतियोगितायां भारतेन पाकिस्तानं षट् स्तोभकैः पराजितम्।**